मीमांसा-परिभाषा ।

श्रीकृष्णयज्वकृता ।

वि, ए, उपाधिधारिणा
श्रीजीवानन्दविद्यासागर-भट्टाचार्य्येण
संस्कृता
प्रकाशिता च

द्वितीय संस्करणम् ।

कलिकातानगरे
"सिद्धेश्वर यन्त्रे"
मुद्रिता ।

ई १९०५ ।

প্রিণ্টর—শ্রীসিদ্ধেশ্বর পান।
৩৮ নং শিবনারায়ণদাসের লেন।

Jibananda Vidyasagara
B.A.

पण्डितकुलपतिः

श्रीजीवानन्दविद्यासागर वि, ए,

PANDIT JIBANANDA VIDYASAGARA B. A.

Superintendent Free Sanskrit College, Calcutta.

मीमांसा-परिभाषा ।

सूर्यनारायणं वन्दे देवीं त्रिपुरसुन्दरीम् ।
गुरूनधिगतार्थांश्च निरन्तरमहं भजे ॥ १ ॥
बालानां शास्त्रसिद्ध्यर्थं लेशबोधाय धीमताम् ।
मीमांसापरिभाषेयं क्रियते कृष्णयज्वना ॥ २ ॥

इह खलु महर्षि-जैमिनिना द्वादशलक्षण्यां पूर्व्वमीमांसायां धर्म्माधर्म्मावेवानुष्ठानोपयोगितया विचारितौ । तत्र वेदबोधितेष्टसाधनताको धर्म्मः । यथा यागादिः ॥ वेदबोधितानिष्टसाधनताकोऽधर्म्मः । यथा कलञ्जभक्षणादिः ॥ तयोश्च वेदः स्मृतिराचारश्च प्रमाणम् । तत्र वेदः स्वतन्त्रप्रमाणम् । तत्र वेदो द्विविधः । मन्त्ररूपो ब्राह्मणरूपश्चेति । तत्र प्रयोगकालीनार्थस्मरणहेतुतया मन्त्राणान्तु प्रयोग इति वक्ष्यते । प्रयोगोऽनुष्ठानं तत्कालीनेत्यर्थः । विधायकं वाक्यं ब्राह्मणम् । ब्राह्मणशेषश्चार्थवादः । तस्य विधेयप्राशस्त्यप्रतीति-जनन-द्वारा विधिवाक्यैकवाक्यतया प्रामाण्यमिति वक्ष्यते ॥

तच्चानेकविधम्—कर्मोत्पत्तिवाक्यम् । गुणवाक्यम् । फलवाक्यम् । फलाय गुणवाक्यम् । सगुणकर्मोत्पत्तिवाक्यमित्यादिभेदात् ॥

तत्र येन वाक्येनेदं कर्म्म कर्त्तव्यमिति बोध्यते तत् कर्मोत्पत्तिवाक्यम् । यथाग्निहोत्रं जुहोति इति, अत्राग्निहोत्रहोमः कर्त्तव्यतया विधीयते इति कर्मोत्पत्तिवाक्यम् ।

विहिते कर्म्मणि तदङ्गतया द्रव्यदेवतादिविधायकं वाक्यं गुणवाक्यम्। यथा दध्ना जुहुयादिति गुणवाक्यमिदम्। कर्म्माङ्गतया विहितत्वमेव दध्नादेर्गुणत्वम्। अत्र होमस्योद्देश्यत्वं नाम मानान्तरप्राप्तत्वे सति विधेयान्वयितया निर्देश्यत्वम्। तस्यैव मानान्तरप्राप्तस्य पुनः कथ्यमानरूपत्वमनुवाद्यत्वम्। दध्यादिगुणान्वयितया प्राधान्यञ्च दध्यादेर्मानान्तराप्राप्तत्वादत्रैव विधेयत्वं होमसाधनत्वाच्च होमापेक्षया गुणत्वम्। पुरुषेणानुष्ठीयमानत्वाच्चोपादेयत्वं चेति। अत्र मानान्तरप्राप्तत्वं मानान्तरज्ञातत्वम्। अप्राप्तत्वञ्चाज्ञातत्वमिति बोध्यम्।

उत्पन्नस्य कर्म्मणः फलाकाङ्क्षायां फलसम्बन्धबोधको विधिः फलविधिः। यथाग्निहोत्रं जुहुयात् स्वर्गकाम इति। अत्र यः स्वर्गं कामयते स तत्साधनत्वेनाग्निहोत्रनामकं होमं भावयेत् कुर्य्यादिति अग्निहोत्रवाक्योत्पन्नस्य कर्म्मणः फलसम्बन्धो बोध्यत इति फलवाक्यमिदम्।

प्राप्तं कर्म्माश्रित्य फलाय गुणविधौ फलाय गुणवाक्यं यथा दध्नेन्द्रियकामस्य जुहुयादिति। अत्राग्निहोत्रवाक्योत्पन्नं होममाश्रित्येन्द्रियफलाय दधिरूपो गुणो विधीयते। होममाश्रितेन दध्ना इन्द्रियरूपं फलं भावयेदिति। होमाश्रितेन होमकारकीभूतेनेत्यर्थः। अयमेव गुणफलविधिः गुणकामविधिरपि चोच्यते।

द्रव्यदेवतादिगुणविशिष्टकर्म्मविधायकं वाक्यं सगुणकर्म्मोत्पत्तिवाक्यम्। यथा ‘सोमेन यजेतेति’। अत्र सोमलताविशिष्टो यागो विधीयते। विशिष्टविधावपि विशेषणस्य अर्थाद्विधिः। क्वचित् कर्म्मोत्पत्तिवाक्यमेव फलसम्बन्धबोधकमपि भवति। यथा “उद्भिदा यजेत पशुकाम” इति अत्रोद्भिन्नामको यागो वाक्यान्तराविहित एव पशुकामस्य पशुफलाय विधीयत

इत्येकमेवेदं वाक्यं फलसाधनयागकर्म्मविधायकम्। प्रधानविधिरेवाङ्गविधिभिरेकवाक्यतया महावाक्यतामापन्नः सन् सर्व्वाङ्गविशिष्टप्रधानप्रयोगविधायकत्वात् प्रयोगविधिरुच्यते। यथा अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यत्राग्निहोत्रहोमेन स्वर्गं भावयेदित्यर्थः। प्रतीयते भावयेत् कुर्य्यादिति यावत् अत्र कथमनेन होमेन स्वर्गं कुर्य्यादिति कथम्भावाकाङ्क्षा जायते यथा कुठारेण द्वैधीभावं कुर्य्यादित्युक्ते भवत्याकाङ्क्षा कथमनेन द्वैधीभावं कुर्य्यादिति। तत्रोद्यमननिपतनादिसहायेनेति गम्यते तद्वदत्राप्यग्निं प्रणयत्यग्निषु समिधदध्ना नोत्पाद्यङ्गविधिविहितप्रणयनसमिदाधानापतनशोधनादिकाङ्गकलापजनितोपकारसहितेनाग्निहोत्रहोमेन स्वर्गं कुर्य्यादिति प्रकरणकल्पितेन महावाक्येन स्वर्गाय साङ्गाग्निहोत्रप्रयोगो विधीयत इत्येतादृशः प्रयोगविधिः। अङ्गजातमेवेत्थम्भाव इतिकर्त्तव्यता चेति चोच्यते अत्राग्निहोत्रहोमः प्रधानप्रणयनादिकं सर्व्वम् अङ्गम्।

नन्विदमनुपपन्नम्। आशुतरविनाशिनां कर्म्मणां कालान्तरभाविस्वर्गादिफलसाधनत्वानुपपत्तेरिति चेन्नैवम्। विहितनिषिद्धकर्म्मणां तत्तद्वाक्यैस्तत्तत्फलसाधनत्वेऽवगते आशुतरविनाशिनां कर्म्मणां कालान्तरभाविफलसाधनस्योपपत्त्यर्थमन्तरा पुण्यपापरूपमपूर्वं कल्प्यते। ततश्च यागादेरपूर्वद्वारा स्वर्गसाधनत्वं न साक्षात्, तदेव फलापूर्वं तत्करणत्वञ्च प्रागुच्याङ्गविशिष्टस्य प्रधानस्य भवति न प्रधानमात्रस्य प्रधानमात्रादेव फलापूर्वजनने फलस्यापि तत एव सिद्धेरङ्गानामानर्थक्यापत्तेः।

ननु सर्व्वाङ्गविशिष्टस्य प्रधानस्यापूर्वजनकत्वमुक्तम्। आशुतरविनाशिनः प्रधानस्याङ्गसाहित्याभावादिति चेन्न।

प्रधानकर्म्मणः स्वरूपेणाङ्गसाहित्याभावेऽपि उत्पत्त्यपूर्वद्वारा साहित्यसम्भवात्। प्रधानस्य सर्वाङ्गसाहित्यसिद्ध्यर्थं प्रधानकर्म्म परमापूर्वयोर्मध्ये प्रधानमात्रजन्यमुत्पत्तिनामकं किञ्चिदपूर्वमस्तीत्यङ्गीकारात्। एवमङ्गानामपि परस्परसाहित्यानामेव प्रधानोपकारकत्वात्तेषां स्वरूपेण साहित्याभावात्, तत्तदुत्पत्त्यपूर्वद्वारा साहित्यं बोध्यम्। अङ्गानां प्रधानोपकारकत्वं नाम प्रधानस्य फलापूर्वजननसामर्थ्योन्मुखीकरणमेव। दर्शपौर्णमासयोस्तु विशेषः। 'यदाग्नेयोऽष्टाकपालोऽमावस्यायाञ्च पौर्णमास्याञ्चाच्युतो भवती' त्याग्नेय यागो विहितः। ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छदित्यग्नीषोमीय यागो विहितः"उपांशुयागमन्तरा यजतीति" उपांशुयागः तावब्रूतामग्नीषोमावाज्यस्यैवनावुपांशु पौर्णमास्यां यजन्तीति वाक्यात् पौर्णमास्यां विहितः। एतानि पौर्णमास्यां प्रधानानि। एषामाग्नेयाग्नीषोमीयोपांशुयागानां तत्तद्वाक्यावगत पौर्णमासीकालसम्बन्धं निमित्तीकृत्य 'य एवं विद्वान् पौर्णमासीं यजत' इति विद्वद्वाक्ये पौर्णमासीपदेनैकवचनान्तेन समुदायरूपेणानुवादः। तेन वेदे यत्र पौर्णमासीशब्दः तत्र तत्राग्नेयादिसमुदायोपस्थितिः। ननु यदाग्नेय इति वाक्ये यागवाचकपदस्याश्रवणात् कथं यागविधायकत्वमिति चेन्नैवम्। अग्निर्देवता अस्य पुरोडाशस्येति अर्थे विहितदेवतातद्धितान्त आग्नेयशब्दः। तस्य पुरोडाशपदसामानाधिकरण्याद्द्रव्यदेवतासम्बन्धोऽवगतः। स यागमन्तरा न सम्भवति द्रव्यदेवतासम्बन्धस्य यागादन्यत्र क्रियायामसम्भवात्। यागक्रियायामेव सम्भवो वाच्यः। देवतोद्देशेन द्रव्यत्यागयागरूपत्वाङ्गीकारात्। अतः श्रुतद्रव्यदेवतासम्बन्धानुमितो यागो यजेतेति कल्पितपदेन विधीयते। अग्नि-

दैवत्यपुरोडाशद्रव्यकामावास्यादिकालकर्त्तव्ययागेनेष्टं भावयेदिति । एवं यत्रयत्र द्रव्यदेवतासम्बन्धमात्रं श्रूयते सौर्य्यञ्चरुं निर्वपेदित्यादौ तत्र सूर्यदेतासम्बन्धानुमितो यागो विधीयत इति न कश्चिद्दोषः ।

तनूपांशुयाजवाक्ये यजिश्रवणेऽपि विधिप्रत्ययलिङादेरभावात् कथं विधायकत्वमिति चेन्नैवं यजतीत्यस्य यजेतेति विपरिणामेन विधायकत्वसम्भवात् एवं यत्र लिङादिर्न श्रूयते 'व्रीहीन् प्रोक्षति' 'समिधो यजती' त्यादौ तत्र विपरिणामो बोध्यः । केचित्तु यजतीत्यस्य पञ्चमलकारत्वाङ्गीकारात् विधायकत्वसम्भव इत्याहुः । तथा ऐन्द्रं दध्यमावास्यायां ऐन्द्रं पयोऽमावस्यायामिति वाक्यविहितौ सान्नाय्ययागौ यदाग्नेय इति वाक्यविहिताग्नेयश्चामावास्यायां प्रधानानि । एषां त्रयाणां 'य एवं विद्वानमावास्याञ्च यजते' इति वाक्येऽमावास्यामिति नाम्ना द्वितीयैकवचनान्तेन समुदायरूपेणानुवादः । तेन वेदे यत्र दर्शशब्दोऽमावास्याशब्दो वा श्रुतस्तत्र यागसमुदायोपस्थितिः । त्रिकस्य त्रिकस्यामावास्यापौर्णमासीभ्यां समुदायरूपेण विद्वद्वाक्येऽनुवादस्य प्रयोजनन्तु दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेत्यादौ द्विवचनोपपत्तिः । अन्यथा षण्णामाग्नेयादियागानां बहुत्वाद्दर्शपौर्णमासैरिति बहुवचनं स्यात् ।

मानान्तरेण प्राप्तार्थस्य पुनः श्रवणमनुवादः । तथा फलवादाग्नेयादिसन्निधावाम्नातानि प्रयाजाज्यभागानुयाजादीनि षण्णां यागानामङ्गभूतानि । एवं स्थिते 'दर्शपौर्णमासाभ्यां स्वर्गकामो यजेते' त्यस्यायमर्थः—दर्शपौर्णमासाभ्यां समुदायाभ्यां परस्परसहिताभ्यां स्वर्गापूर्वं कुर्यादिति । तत्र कथं कालद्वयवर्त्तिनोः समुदाययोः परस्परसाहित्यमित्याकाङ्क्षायां

स्वरूपेण साहित्याभावेऽपि त्रिकास्त्रिकादेकैकपूर्वं जायते। तद्द्वारा द्वयोः समुदाययोः साहित्यमित्युच्यते। एकैकस्य त्रिकस्य त्रिकस्यापि त्रिकापूर्वजनकत्वं कथमित्याकाङ्क्षायां प्रयाजानुयाजादिपूर्वोत्तराङ्गफलाय विशिष्टस्यैकैकस्य त्रिकस्य समुदायापूर्वजनकत्वमुच्यते। एकैकत्रिकस्य सर्वाङ्गसाहित्यं स्वरूपेण न सम्भवतीति त्रिभिर्यागैस्त्रीण्युत्पत्त्यपूर्वाणि जायते तद्द्वारा सर्वाङ्गसाहित्ये अङ्गानामपि प्रयाजादीनां स्वरूपेण प्रधानसाहित्याभावात्तत्तदुत्पत्त्यपूर्वद्वारा साहित्यं वाच्यम्। तथा च प्रधानजन्योत्पत्त्यपूर्व्वाणां प्रयाजादिजन्योत्पत्त्यपूर्वैः साहित्यं यदस्ति तदेव प्रधानानामङ्गविशिष्टत्वरूपसाङ्गत्वम् एवञ्च पौर्णमास्यामाग्नेयादिजन्यैस्त्रिभिरपूर्वैः प्रयाजादिजन्योत्पत्त्यपूर्वसचिवैः समुदायापूर्वमेकं जन्यते। तथा दर्शेऽपि आग्नेयैन्द्रियद्वयजन्यैस्त्रिभिरपूर्वैरङ्गोत्पत्त्यपूर्वसचिवैरेकं त्रिकापूर्वं जन्यते। ताभ्यान्त्रिकापूर्वाभ्याम् आग्नेयाद्युत्पत्त्यपूर्वत्रितयजन्याभ्यां फलजनकीभूतमहापूर्वं फलापूर्वनामकं जन्यते। ततश्च फलमिति। तथा च सर्वाङ्गोपहिताभ्यां दर्शपौर्णमासाभ्यामपूर्वद्वारा स्वर्गं कुर्य्यादिति फलापूर्वनिष्पत्तये साङ्गप्रधानकर्त्तव्यताबोधको विधिः प्रयोगविधिरिति सिद्धम्।

पुनरपि त्रिविधः। अपूर्वविधिर्नियमविधिः परिसंख्याविधिश्चेति। तत्र यो विधिरत्यन्ताप्राप्तमर्थं प्रापयति स अपूर्वविधिः, यथा दर्शपौर्णमासप्रकरणे व्रीहीन् प्रोक्षतीति। एतद्विध्यभावे दर्शपौर्णमासीयव्रीहिषु प्रोक्षणं कथमपि न प्राप्नोति। एतद्विधिसत्वे तु तत्सम्बन्धिव्रीहिषु प्रोक्षणं प्राप्नोत्येवेत्यत्यन्ताप्राप्तप्रोक्षणप्रापकत्वादयमपूर्वविधिः।

यो विधिः पक्षे प्राप्तमर्थं नियमयति स नियमविधिः तत्रैव

ब्रीहीनवहन्तीति। एतद्विध्यभावे दर्शपौर्णमासिकेषु ब्रीहिषूत्पत्ति-वाक्यावगत-पुरोडाशोपयोगि-तण्डुल--निष्पत्त्यनुकूल-वैतुष्यकार्य्यायावहननवत् कदाचिन्नखविदलनमपि प्राप्नुयादिति तस्मिन् पक्षेऽवहननस्य प्राप्त्यभावात् कार्य्यान्वयोपपत्तेरवहननस्य पाक्षिकी प्राप्तिः स्यात् सत्यस्मिन् विधौ अवहननेनैव वैतुष्यं कार्य्यमिति नियमे सति विदलनं सर्वात्मना निवर्त्तेत इति नियमविधिरयम्। न च वैतुष्यस्य नखविदलनेनापि सम्भवादवहनननियमो व्यर्थः प्रयोजनाभावादिति वाच्यम्। अवघातेनैव वैतुष्यकरणे किञ्चिददृष्टं जन्यते इति नियमाददृष्टाङ्गीकारात्। नियमेन दृष्टकार्य्यलाभेऽप्यदृष्टस्योत्पत्तेः। तच्चापूर्वं यागोत्पत्त्यपूर्वद्वाराफलापूर्वे उपयुज्यते तेन नियमापूर्वाभावे फलापूर्वमेव नोत्पद्यत इति कल्पनान्नियमापूर्वस्य न वैयर्थ्यम्। एवं ब्रीहिसोमादिनियमविधिषु बोध्यम्।

'द्वयोः समुच्चित्यप्राप्तावितरनिवृत्तिफलको विधिः परिसङ्ख्याविधिः।' यथा चयनप्रकरणे।—'इमामगृह्णन् रसनामृजस्येत्यश्वाभिधानीमादत्त' इत्यश्वरसनाग्रहणाङ्गत्वेन मन्त्रविधिः। एतद्विध्यभावे हि रसनाग्रहणप्रकाशको मन्त्रो रसनादानप्रकाशनसामर्थ्यरूपाल्लिङ्गादश्वरसनादान इव गर्दभरशनादानेऽपि नियमेन प्राप्नुयात्। सत्यस्मिन् विधौ अनेन मन्त्रेणाश्वरशनामेवाददीत न तु गर्दभरशना सा तु तूष्णीमेव ग्राह्येति गर्दभरशनानां मन्त्रनिवृत्तिर्भवतीति द्वयोः समुच्चित्यप्राप्तावितरनिवृत्तिफलकत्वादयं परिसङ्ख्याविधिः। पूर्वं दर्शपौर्णमासाङ्गत्वं प्रयाजादीनामुक्तम्।

तत्राङ्गत्वबोधकप्रमाणानि श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्या-भेदेन षट्। तत्र दध्ना जुहुया[illegible]होत्रवाक्य-

प्राप्तं होमं जुहुयादित्यनेनोद्दिश्य तत् करणत्वेन तृतीया श्रुत्या दधि विधीयत इति श्रुत्या दध्नोऽङ्गत्वम् ।

लिङ्गं नाम सामर्थ्यम् । तच्च द्विविधम् । अर्थगतं शब्दगतञ्चेति । आद्यं यथा स्रुवेणावद्यतीत्यवदानसामान्यशेषत्वावगमेऽपि स्रुवस्य सामर्थ्यरूपाल्लिङ्गादाज्यसान्नाय्यादिद्रवद्रव्यस्यावदानविशेषाङ्गत्वं स्रुवेण पुरोडाशाद्यवदानस्य कर्त्तुमशक्यत्वात् । शब्दगतं तु लिङ्गमर्थप्रकाशनसामर्थ्यम् । यथा अग्नये जुष्टं निर्वपामीति मन्त्रस्य निर्वापप्रकाशनसामर्थ्यरूपात् लिङ्गान्निर्वापाङ्गत्वम् । यस्य मन्त्रस्य यत् प्रकाशनसामर्थ्यं तस्य तदङ्गत्वं पदान्तरसमभिव्याहारो वाक्यम् । यथा इषेत्वेति छिनत्तीति अत्र छेदनाङ्गत्वेन इषे त्वेतिमन्त्रवाक्येन विधीयते । यद्वा अग्नये जुष्टमित्यत्रैव अग्नये जुष्टमित्यादिपदानां निर्वपामीत्यनेनैकवाक्यतापन्नत्वान्निर्वपाङ्गत्वम् । प्रकरणं नाम परस्पराकाङ्क्षा । यथा दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेति अत्र दर्शपौर्णमासाभ्यां स्वर्गापूर्वं कुर्य्यादित्युक्ते भवत्याकाङ्क्षा कथमाभ्यां स्वर्गापूर्वं कर्त्तव्यमिति तथा फलवदाग्नेयादिसन्निधौ समिधो यजति तनूनपातं यजति आज्यभागौ यजतीत्यादिभिः प्रयाजादयः फलरहिताः श्रुतास्तेषां स्ववाक्येषु फलाश्रवणात् भवति प्रयोजनाकाङ्क्षा किमेतेषां प्रयोजनमिति प्रयाजादीनां प्रयोजनाकांक्षायां दर्शपौर्णमासयोः कथम्भावाकांक्षायां परस्पराकांक्षा लक्षणेन प्रकरणेन प्रयाजादीनां सर्वेषां दर्शपौर्णमासाङ्गत्वं निश्चीयते ॥

स्थानं नाम सन्निधिः । यथा सान्नाय्यपात्रसन्निधौ शुन्धध्वमिति मन्त्रस्य पाठात् सन्निधानात् सान्नाय्यपात्रप्रोक्षणाङ्गत्वम् ।

समाख्या संज्ञा । यथा अध्वर्युकाण्डप्रतिपादिते कर्म्म-

जाते आध्वर्यवसमाख्यावशादध्वर्य्योः कर्तृत्वेनाङ्गत्वम्। तथा 'ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः' इत्यादिषु काम्येष्टिसमाख्यातेषु ऐन्द्राग्नादियागेषु काम्येष्टियाज्यानुवाक्याकाण्डसमाख्यावशादुभावामिन्द्राग्नी इत्यादीनां याज्यानुवाक्यत्वेन विनियोगः। विनियोगानामङ्गत्वेनान्वयः।

श्रुत्यादीनामेकत्र समावेशे पूर्वपूर्वस्य प्राबल्यम् उत्तरोत्तरस्य दौर्बल्यम्। यथा 'कदाचनस्तरीरसीत्यैन्द्र्या गार्हपत्यमुपतिष्ठत इत्यग्निहोत्रप्रकरणे श्रूयते तत्र मन्त्रस्य इन्द्रप्रकाशनसामर्थ्यरूपात् लिङ्गादिन्द्रोपस्थानाङ्गत्वे प्राप्ते ऐन्द्र्येति तृतीयाश्रुत्या गार्हपत्यमिति द्वितीयाश्रुत्या च गार्हपत्योपस्थानाङ्गत्वेन विधिना लैङ्गिक इन्द्रोपस्थाने विनियोगो बाध्यते श्रुतिर्हि स्वतो विनियोजिका लिङ्गन्त्विन्द्रप्रकाशनसामर्थ्यमालोच्य 'ऐन्द्र्येन्द्रमुपतिष्ठते' इति श्रुतिकल्पनाद्वारा विनियोजकमिति वाच्यम्। तच्चात्र न सम्भवति। यत्र श्रुतिविनियोगो नास्ति 'अग्नये जुष्टं निर्वपामीत्यादौ तत्र मन्त्रस्य निर्वापप्रकाशनसामर्थ्यमालोच्य अनेन मन्त्रेण निर्वापं कुर्य्यादिति श्रुतिकल्पनाद्वारा लिङ्गं विनियोजकं भवत्येव, श्रुतिकल्पनाप्रतिबन्धकाभावात्। तथा 'स्योनन्ते सदनं करोमि तस्मिन् सीदेत्यत्र तस्मिन्निति तच्छब्दस्य पूर्ववाक्यार्थसापेक्षतया एकवाक्यत्वभानाद्वाक्यप्रमाणेन द्वयोरेकमन्त्रत्वं भाति लिङ्गेन भिन्नमन्त्रत्वं भाति आयस्पन्दनप्रकाशनसामर्थ्यात्। तस्मिन् सीदेत्यस्य सादनप्रकाशकत्वात्। तत्र वाक्यापेक्षया लिङ्गस्य प्राबल्याद्वाक्यं बाधित्वा लिङ्गेन स्योनन्त इत्यस्य सदनाङ्गत्वं तस्मिन् सीदेत्यस्य सादनाङ्गत्वमिति निर्णयः। स्योनन्त इत्यस्य तस्मिन् सीदेत्यनेनैकवाक्यत्वबलाद्यथाकथञ्चित्सादनसामर्थ्यरूपलिङ्गं कल्पयित्वा अनेन विशिष्टमन्त्रेण सादनं

कुर्य्यादिति श्रुत्या स्योनन्तः इत्यस्य शीघ्रं सदने विनियोगे सति तेनैव मन्त्रस्य नैरकाङ्क्ष्याद्वाक्यप्रमाणात् लिङ्गं कल्पयित्वा श्रुतिकल्पना प्रतिवध्यते विलम्बितत्वादिति लिङ्गेन वाक्यस्य बाधः। एवं वाक्येन प्रकरणस्य, प्रकरणात् क्रमस्य क्रमात्समाख्यायाः बाधो वेदितव्यः। तथा श्रुत्या वाक्यादेरपि बाधः। तदेवमङ्गताबोधकप्रमाणानि श्रुत्यादीनि निरूपितानि।

तच्चाङ्गत्वं पारार्थ्यमिति यावत्। परोद्देशेन प्रवृत्तकृतिव्याप्यत्वं पारार्थ्यं प्रयाजादीनां दर्शपौर्णमासोद्देशेन प्रवृत्तपुरुषकृतिव्याप्यत्वात् लक्षणसङ्गतिः दर्शादेः प्रयाजाद्युद्दिश्य प्रवृत्तकृतिविषयत्वाभावान्नातिव्याप्तिः। केवलप्रयाजानुद्दिश्य कस्यचिदपि पुरुषस्याप्रवृत्तेः। तान्यङ्गानि द्विविधानि सन्निपत्योपकारकाणि, आरादुपकारकाणीति चेति। यान्यङ्गानि साक्षात्परम्परया प्रधानयागशरीरं निष्पाद्य तत् द्वारा तदुत्पत्त्यपूर्वोपयोगीनि तानि सन्निपत्योपकारकाणि। यथा व्रीह्यादिद्रव्याणि तत्संयुक्तावहननप्रोक्षणादीनि अग्न्यादिदेवतातत्संयुक्तयाज्यानुवाक्यावचनादीनि च। अत्र प्रोक्षणादेर्व्रीहिगतातिशयद्वारा अवहननादेस्तुषविमोकादिरूपदृष्टद्वारा व्रीह्यादीनां पिष्टद्वारा पुरोडाशनिष्पादकत्वं तद्द्वारा यागशरीरतदुत्पत्त्यपूर्व्वहेतुत्वञ्च याज्यानुवाक्यादेर्देवतासंस्कारद्वारा देवतायाश्च साक्षाद्यागशरीरनिर्वर्त्तकत्वं तद्द्वारा तदुत्पत्त्यपूर्व्वोपयोगित्वञ्च। यागस्य देवतोद्देशेन द्रव्यत्यागरूपत्वात्। द्रव्यदेवते हि यागस्वरूपमिति सिद्धान्ताच्च। एतान्येव समवायिकारणानीत्युच्यन्ते॥

आत्मसमवेतापूर्व्वजनकान्यारादुपकारकाणि। यथा। प्रयाजाज्यभागानूयाजादीनि। एतानि द्रव्यगतदेवतागतं वा संस्कारं न जनयन्ति। किन्त्वात्मगतमदृष्टं जनयन्तीत्यारादुपकार-

काणि। तत्र सामान्यत: कर्म्म द्विविधम्। अर्थ कर्म्म, गुणकर्म्म चेति। तत्रात्मगतापूर्व्वजनकं कर्म्मार्थकर्म्म। यथा अग्निहोत्रं दर्शपौर्णमासप्रयाजादिकम्॥

गुणकर्म्म संस्कारजनकम्। तच्च द्विविधम्। उपयुक्तसंस्कारकम्, उपयोक्ष्यमाणसंस्कारकञ्च। तत्र उपयुक्तसंस्कारकं प्रतिपत्तिकर्म्म। उपयुक्तस्य आकीर्णकरस्य द्रव्यस्य विहितदेशे प्रक्षेप: प्रतिपत्तिरिति लक्षणात्। यथा इड़ाभक्षणकृष्णविषाणप्रासनचतुरवत्तहोमादिकम्। नन्विड़ाभक्षणस्य प्रधानयागोपयुक्ताकीर्णकरपुरोड़ाशद्रव्यप्रक्षेपात्मकत्वात् प्रतिपत्तित्वं युक्तम्। होमस्य तु यागोपयुक्तद्रव्यसंस्कारकत्वाभावात् कथं प्रतिपत्तित्वम्। होमस्य यागसमानकालीनत्वेन होमसंस्कार्य्यस्य चतुरवत्तादेरुपयुक्तत्वाभावादिति चेदत्राहु:। उपयुक्तसंस्कारमात्रं प्रतिपत्ति: न तु प्रधानयागोपयुक्तत्वम्। तथा सति पशोर्विशसनानन्तरं वपाहृदयाद्युद्धरणकालकर्त्तव्यहोलोहितशकृन्निरसनस्य प्रतिपत्तित्वाभावप्रसङ्गात्। यागोपयुक्तद्रव्यप्रक्षेपरूपत्वाभावात्। तथा कृष्णविषाणप्रासनस्यापि प्रतिपत्तित्वं न स्यात्। यागाङ्गभूतकण्डूयनोपयुक्तत्वेऽपि यागोपपत्तत्वाभावात्। अतो यत्र क्वचनोपयोगमात्रं विवक्षितं तत्र क्वचिदुपयोग: तत्राप्यस्ति वसाहृदयाद्युद्धरणेनोपयुक्तपशो: सम्बन्धिन: सकृल्लोहितस्याकीर्णकरस्य प्रतिपत्त्यपेक्षत्वात्। एवं यथा कथञ्चिदुपयोगो होमस्थलेऽप्यस्ति॥

तथाहि, प्रतिपत्तिस्त्रिधा—प्रधानोत्तरकाला, प्रधानसमकाला, प्रधानपूर्व्वकाला चेति। तत्राद्या इड़ाभक्षणादिका। द्वितीया होमादिका। तथाहि—दर्शपूर्णमासप्रकरणे श्रूयते—'सकृदुपस्तृणाति रणे 'द्विर्हविषोवद्यति' 'सकृदभिघारयति' 'चतुरवत्तञ्जुहोति।' तत्र चतुरवत्त-

वाक्ये होमानुवादेन चतुरवत्तद्रव्यं तत्साधनत्वेन न विधीयते। न च यागहोमयोरभेद इति वाच्यम्। देवतोद्देशे द्रव्यत्यागस्य यागशब्दार्थत्वात्। प्रक्षेपविशिष्टस्य यागस्य होमशब्दार्थत्वात्। तत्राग्नेयचोदनया यागस्य प्राप्तत्वेऽपि प्रक्षेपांशस्याप्राप्तत्वेनानुवादासम्भवात्। किन्तूपस्तरणहविरवदानाभिघारणवाक्यैः प्राप्तं चतुरवत्तमुद्दिश्य तत्संस्कारत्वेन प्रक्षेपो जुहोतीत्यनेन विधीयते। स च संस्कारः प्रतिपत्तिरूप एव। अग्नये जुष्टमभिघारयामीत्यादि निर्देशैर्यागाङ्गभूताग्न्यादिदेवतार्थतया यथाकथञ्चिदुपयुक्तस्य पुरोडाशस्य प्रतिपत्त्यपेक्षया यद्दक्षाचदानकर्म्मकप्रक्षेपस्य प्रतिपत्तिकर्म्मत्वौचित्यात्। स च संस्कारः प्रधानसमकालः। होमो हि वषट्कृते जुहोतीति विधानात्। वषट्कारोत्तरक्षणे अध्वर्य्युकर्त्तव्यः यागोऽपि तस्मिन्नेव क्षणे यागस्य स्मरणार्थत्वे वषट्कारेण स्मारितः सन् यजमानेनानुष्ठेय इति तयोर्यौगपद्यसम्भवात्। तदिदं सर्व्वप्रधानाधिकरणवार्त्तिके स्थितम्। प्रधानपूर्व्वकाला प्रतिपत्तिर्यथा— शकृत्संविध्यति लोहितं निरस्यतीति शकृत्संप्रवेधन लोहितनिरसने। इदमपि पशावनालम्भात् लोहितशकृतोः कर्द्धत्वमित्यधिकरणे स्थितम्॥

उपयोक्ष्यमाणसंस्कारोऽप्यनेकविधः। साक्षाद्विनियुक्त संस्कारः। साक्षाद्विनियुक्तस्य यदुपकारकं तत्संस्कारः। विनियोक्ष्यमाण संस्कारश्चेति। तत्राद्यो यथा—'वत्समालभेतेति। दोहाङ्गत्वेन साक्षाद् विनियुक्तस्य गोद्रव्यस्योपकारको वत्सस्तत्संस्कारकमिदमालम्भनम्। तृतीयो यथा— 'तप्ते पयसि दध्यानयतीति' 'अवत्सा वैश्वदेव्या मामिक्षेति वाक्येन तच्छब्देन निर्दिश्य वैश्वदेवयागाङ्गत्वेन विनियोक्ष्य-

माणे यत्पयस्तत्संस्कारकत्वाद्विनियोक्ष्यमाणसंस्कारकं दध्यानयनम्। पशुपुरोडाशयागस्तूपयुक्तोपयोक्ष्यमाणदेवता संस्कारार्थः। त्यागांशे अदृष्टार्थश्च अत्र तत्संस्कार्य्याग्निषोमदेवताया वपायागे उपयुक्तार्थत्वात्। हृदपाद्यङ्गयागेषु उपयोक्ष्यमाणत्वाच्च। स्विष्टकृद्यागे द्रव्यांशे देवतांशे च उपयुक्तसंस्कारार्थः त्यागांशे अदृष्टार्थश्च सूक्तवाक् साधनप्रमाणमपि तथैव। उत्तमप्रयाजो यक्ष्यमाणदेवता संस्कारत्वात्तदंशे उपयोक्ष्यमाणसंस्कारः इतरांशे अदृष्टार्थः हृदयादिर्हविर्यागात्पूर्व्वं क्रियमाणो वसाहोमोऽपि वसांशे प्रतिपत्तिरितरांशे अदृष्टार्थ इत्याद्यूह्यम्। केचित्तु उपयोक्ष्यमाणसंस्कारभिन्नसंस्कारकर्म्मत्वं प्रतिपत्तिकर्म्मत्वम्। चतुरवत्तद्रव्यस्य होमेन भस्मीभूतस्य होमे उपयोक्ष्यमाणत्वाभावात्। तद्भिन्नत्वं होमेऽस्तीति लक्षणसङ्गतिः। अत्रायं विशेषः। अर्थकर्म्मणि द्रव्यापेक्षया कर्म्मणां प्राधान्यम्। कर्म्मणि द्रव्यस्य गुणत्वम्। यथा अग्निहोत्रादौ दध्यादेर्गुणत्वं, गुणकर्म्मणि द्रव्यस्य प्राधान्यं, द्रव्ये च कर्म्मणो गुणत्वं, व्रीहीन् प्रोक्षति अवहन्तीत्यादौ द्वितीयया व्रीहीणां क्रिया साध्यत्वप्रतीतेः क्रियापेक्षया द्रव्यस्य प्राधान्यं प्रोक्षणादिक्रियायास्तदपेक्षया गुणत्वमिति॥

पुनरपि गुणकर्म्म चतुर्विधम्। उत्पत्त्याप्तिविकृतिसंस्कृतिभेदात्। तत्रोत्पत्तिसंस्कारो यथा अग्नीनादधीतेति-मन्त्रविशेषैः सम्भारेषु निधायितापि आहवनीयादय उत्पद्यन्त इत्याहवनीयाद्युत्पत्तिहेतुभूतसंस्कारजनकत्वादाधानस्य उत्पत्तिसंस्कारत्वम्। आप्तिसंस्कारो यथा—'स्वाध्यायोऽध्येतव्य इति अध्ययनेन स्वाध्याय आप्यत इत्याप्तिसंस्कारोऽयम्। विकृतिर्यथा—'व्रीहीन् प्रोक्षतीति। अत्र प्रोक्षणस्य व्रीहिगतातिशयरूपसंस्कृतिजनकत्वात् संस्कृतिरूपिगुणकर्म्मत्वम्। अत्रा-

धानमध्ययनञ्च स्वतन्त्रं गुणकर्म्म न तु क्रत्वङ्गम्। प्रोक्षणादिकं सर्व्वं क्रत्वङ्गम् गुणकर्मेति ध्येयम्॥

अर्थकर्म्म त्रिविधम्। नित्यनैमित्तिककाम्यभेदात्। तत्र यावज्जीवमग्निहोत्रं जुहोति' "सायं जुहोति" 'प्रातर्जुहोति जीवता पुरुषेण सायं प्रातः कालयोः नियमेन कर्त्तव्यतया अवगतमग्निहोत्रादिकं नित्यम्। अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेदिति दर्शपूर्णमासातिपत्तिनिमित्तक पथिकृदिष्ट्यादिकं नैमित्तिकम्। नित्यनैमित्तिकयोरकरणे प्रत्यवाय एव। कृते फलं नास्तीति केचित्। अन्ये तु दुरितनिवृत्तिः फलमस्ति। नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयमित्यादिवाक्यैः प्रत्यवायनिवृत्तेः फलत्वेन श्रूयमाणत्वात्। नचैवं तयोरपि काम्यत्वापत्तिः फलवत्वादिति वाच्यम्। फलकामनापूर्वकानुष्ठानाभावात्। तत्तद्विधिवाक्य फलकाममुद्दिश्य तदर्थफलसाधनत्वेन विधानाभावाच्च काम्यत्वानुपपत्तेः॥

काम्यमपि कर्म्म त्रिविधम्। केवलमैहिकफलकम्, आमुष्मिकम्, ऐहिकामुष्मिकफलकञ्चेति। तत्राद्यं यथाकारीर्य्यादि। तत्तत्समयवर्त्तिशुष्यत्शस्यसञ्जीवनहेतुवृष्टिकामिना क्रियते। न कालान्तरभाविवृष्टिकामेन जन्मान्तरीयवृष्टिकामेन वा। केवलामुष्मिकफलकं यथा—स्वर्गार्थदर्शपूर्णमासादिकं स्वर्गस्य इहलोकभोग्यत्वाभावात्। ऐहिकामुष्मिकसाधारणफलकं यथा—'वायव्यं श्वेतमालभेत भूतिकाम इति भूत्यादिफलकमित्यत्र विस्तारः। ननु दर्शपूर्णमासादिकर्म्मणां व्रीह्यादिद्रव्याणाञ्च प्रत्यक्षत्वेन लौकिकत्वात्। कथं वेदस्यालौकिकार्थबोधकत्वमिति चेन्न, कर्म्मणां प्रत्यक्षत्वेऽपि तेषां स्वर्गादिफलसाधनतया कर्म्मकर्त्तव्यताबोधकस्य वेदस्या-

लौकिकार्थबोधकत्वात्। एवं ब्रीह्यादीनां यागादिक्रियासाधनत्वं न प्रत्यक्षवेद्यमिति। तद्बोधकस्यापि वेदवाक्यस्यालौकिकार्थबोधकत्वमिति न दोषः। इदानीं विधिवाक्यस्य विधायकत्वप्रकारः कथ्यते। तत्र स्वर्गकामो यजेतेत्यत्र यजिधातोरुपरितने त-प्रत्यये धर्म्मद्वयमस्ति। आख्यातत्वं लिङ्त्वञ्चेति। तत्र आख्यातत्वञ्च सर्वलकारसाधारणम्। तदवच्छेदेन लिङ्प्रत्ययः पुरुषप्रवृत्तिरूपाम् अर्थभावनां प्रतिपादयति। सा चार्थभावना किं? केन? कथमिति अंशत्रयविशिष्टा। तथाहि यजेतेत्यत्र प्रथमं प्रत्ययेन भावयेदिति प्रतीयते। सुबन्ताभिहितानां सर्वेषां कारकाणां तिङन्तार्थक्रियान्वयनियमे सति तिङन्तार्थस्य प्राधान्यात्। तत्र प्रकृत्यर्थापेक्षया प्रत्ययार्थस्य प्राधान्यात्। प्रथमप्रत्ययार्थभावनाय उपस्थितिर्युक्ता। ततः करोति-समानार्थकं भावयतेः सकर्म्मकत्वात् कम्भावयेदिति कर्म्माकाङ्क्षायां भिन्नपदोपात्तोऽपि स्वर्गो भाव्यत्वेनान्वेति। दुःसाध्यात्मकस्य यागस्य ईप्सिततमस्वरूपकर्म्मत्वायोग्यत्वात्। स्वर्गस्य त्वानन्दात्मकत्वेन ईप्सिततमतया कर्म्मत्वेनान्वययोग्यत्वात्। ततश्च स्वर्गं भावयेदिति बोधो भवति। ततः केनेति करणाकाङ्क्षायां समानपदोपात्तो यागः करणत्वेनान्वेति। यागेन स्वर्गं कुर्य्यादिति। ततः कथं यागेन स्वर्गं कुर्य्यादिति कथम्भावाकाङ्क्षायां अग्न्यन्वाधानावहननादिजन्यदृष्टोपकारेण प्रयाजादिजातितादर्थ्योपकारेण सहितेन यागेन स्वर्गं कुर्य्यादिति। अग्न्यन्वाधानप्रयाजादिकमङ्गजातमितिकर्त्तव्यतयान्वेति कथम्भावाकाङ्क्षापूरकत्वमिति कर्त्तव्यतात्वम्। यथा ओदनकामः पचेदित्यत्र लिङा भावना प्रतीयते। किं भावयेदित्याकाङ्क्षायाम् ओदनो भाव्यत्वेनान्वेति। केनेत्याकाङ्क्षायां पाके-

नेति लभ्यते। कथमित्याकाङ्क्षायां तृणफुत्कारसहितेनेति। ततश्च तृणफुत्काराद्युपकृतेन पाकेन तेजःसंयोगेन ओदनम्भावयेदिति वाक्यार्थः सम्पद्यते तद्वद्वेदेऽपि बोध्यः। स एवं लिङ्त्वावच्छेदेन शब्दभावनां प्रेरणाख्यामभिधत्ते। लोकेऽपि गामानयेदित्याचार्य्यवाक्यश्रवणानन्तरम् अयमाचार्यो माङ्गामानयेति प्रेरयतीति प्रेरणाख्यव्यापारं ज्ञात्वैव शिष्यो गवानयने प्रवर्त्तत इत्यन्वयव्यतिरेकाभ्यां प्रेरणाज्ञानं प्रकृतिकारणं प्रेरणाज्ञानस्य चान्वयव्यतिरेकाभ्यां लिङादिश्रवणजन्यत्वावधारणात्, लिङादेः प्रेरणायां शक्तिर्लोके गृह्यते इति वेदेऽपि तत्रैव शक्तिकल्पनौचित्यात्। इयांस्तु विशेषः लोके गवानयनादि प्रत्यनुकूलप्रेरणाख्यो व्यापारः प्रयोक्तृपुरुषगताभिप्रायविशेषः, वेदे तु प्रयोक्तृपुरुषाभावात् लिङ्गादिशब्दनिष्ठ एव स इत्यङ्गीक्रियते अतएव शब्दनिष्ठव्यापारत्वाच्छाब्दीभावनेत्युच्यते यागहोमादिविषयप्रवृत्तिहेतुत्वात् प्रवर्त्तना प्रेरणेति चोच्यते।

सैषा शब्दभावनापि अंशत्रयविशिष्टा—तत्र पुरुषप्रवृत्तिरूपार्थे भावना भाव्यत्वेनान्वेति। अध्ययनावगतं लिङादिकं करणत्वे नान्वेति। अर्थवादप्रतिपाद्यप्राशस्त्यज्ञानानामितिकर्त्तव्यतात्वेनान्वेति। तत्र साङ्गवेदाध्येतारोऽधीतव्याकरणनिगमनिरुक्तादिवशाद् व्युत्पत्तिमन्तः पुरुषा अध्ययनगृहीतस्वाध्यायगतलिङादिभिः प्राशस्त्यज्ञानसचिवैर्यागाद्यर्थस्य कर्त्तव्यत्वेन बुध्वा यागादीननुतिष्ठेरन् इति शाब्दीभावनाबोधः। अनुष्ठानं कुर्युरित्यर्थ अनुष्ठाने प्रवृत्तिः, तेन पुरुषप्रवृत्तौ शब्दभावना-भाव्यत्वमक्षतम्। इयञ्च शब्दभावना ज्योतिष्टोमादिप्रातिस्विकयागेषु स्वरूपेण प्रतीयमानापि कर्त्तव्यत्वेन न प्रतीयते। न चात्रार्थभावनाया एव विधेयत्वमिति वाच्यम्।

'स्वाध्यायोऽध्येतव्यः' इति वाक्यस्यार्थभावनाया एव सकलविधिवाक्यस्य शब्दभावनारूपत्वात्। तथाहि—अधिपूर्व्वकादिङध्ययने इति धातोः कर्म्मणि तव्य प्रत्ययो विहितकर्म्म च स्वाध्यायप्रधानं, तत्संस्कारमध्ययनं गुणकर्म्म। व्रीहिसंस्कारप्रोक्षणादिवत् अध्ययनजनितग्रहणसंस्कारविशिष्टस्वाध्यायस्य प्रयोजनाकाङ्क्षायां स्वाध्यायगतलिङादिविशिष्टवाक्यसामर्थ्यलभ्यं यदनुष्ठानौपयिकयागादिरूपार्थज्ञानं तदेव दृष्टत्वात् तत्कर्म्मानुष्ठानद्वारा स्वर्गादिरूपालौकिकश्रेयः साधनत्वाच्च प्रयोजनं कर्मावबोधं विना कर्मानुष्ठानयोगात् न त्वदृष्टं प्रयोजनं, दृष्टफले सम्भवत्यदृष्टफलकल्पनायोगात्। तथाच स्वाध्यायविधिनैव स्वाध्यायगतविधिवाक्यगतलिङादिप्रतिपादिताः सर्वाः शब्दभावना अंशत्रयविशिष्टाः कर्त्तव्यत्वेन विधीयते। साङ्गवेदाध्ययनव्युत्पन्नाः पुरुषाः अध्ययनगृहीतस्वाध्यायगतलिङादिभिरर्थवादावगतप्राशस्त्यरूपाङ्गसचिवैः फलवद्यागादिकर्त्तृतां बुध्वा यागादीननुतिष्ठेयुरिति, अनुतिष्ठेयुः प्रवृत्तिं कुर्युरित्यर्थः। तत्र पुरुषप्रवृत्तेर्भाव्यत्वेनान्वयात्; अध्ययनावगतलिङादेः करणत्वेनान्वयात्, प्राशस्त्यज्ञानस्येतिकर्त्तव्यतात्वेनान्वयात्, शब्दभावनाया अपि अंशत्रयवैशिष्ट्यम्। अर्थभावानाया इव इष्टं तत्र समीहितस्वर्गादिभाव्यकत्वमानमपि विधिवशादेव प्रवर्त्तनायाङ्गविधिः, यागादेः पुरुषार्थसाधनत्वे तत्र पुरुषं प्रवर्त्तयितुं शक्नोतीति स्वाभाव्यपुरुषप्रतिविषयस्य यागादेः पुरुषाभिलषितस्वर्गादिसाधनत्वमापादयति। अन्यथा स्वप्रवर्त्तनात्वमेव न स्यात्। प्रवृत्तिहेतुव्यापारस्यैव प्रवर्त्तनत्वात्। तङादिस्थले तु प्रवर्त्तनात्मकविधेरभावादर्थभावनायाः पुरुषार्थभाव्यत्वनियमो नास्ति।

भावनात्वं नाम भवितुः प्रयोजकव्यापारत्वम्। तत्रार्थभावनायाम् भवितुर्जायमानस्य स्वर्गादेः प्रयोजकव्यापारत्वात् लक्षणसङ्गतिः। शब्दभावनायामपि पुरुषप्रवृत्तिरूपस्य भवितुः प्रयोजकव्यापारत्वात् लक्षणसङ्गतिः। ननु 'ज्योतिष्टोमेन स्वर्गकामो यजेदित्यत्र यागेन स्वर्गं भावयेदित्यर्थवर्णने ज्योतिष्टोमपदस्य कथमन्वयः?—इति चेन्न, भावनाकरणत्वेनाभिमतयागनामत्वेनान्वयात्—ज्योतिष्टोमनामकेन यागेनेति। कथं तन्नामत्वमिति चेन्न, ज्योतिराख्यास्त्रिवृदादिस्तोमा अस्मिन् सन्तीति व्युत्पत्त्या यागनामत्वात्। यागस्य त्रिवृदादिस्तोमसम्बन्धः केनावगम्यते? इति चेन्न, त्रिवृत् पञ्चदशः सप्तदशः स्तोमा इति वाक्यान्तरेण एतच्छब्दार्थस्य तत्सम्बन्धावगमात्, एवं शास्त्रोक्तैस्तत्प्रख्यादिभिर्हेतुभिस्तत्र नामत्वं बोध्यम्, शास्त्रे हि तत्प्रख्यतद्व्यपदेशयौक्तिकवाक्यभेदैश्चतुर्भिर्नामत्वं प्रतिपादितम्। तथाहि—'अग्निहोत्र जुहोतीत्यत्र 'अग्निहोत्रशब्देन अग्निदेवतारूपो गुणो न विधीयते। अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोतीति वाक्यविहितेन मन्त्रेण देवतायाः प्राप्तत्वात् किन्तु अग्निप्रख्यापकम् अग्निप्रापकं यच्छास्त्रान्तरम् 'अग्नीर्ज्योतिर्ज्योतिरग्निरित्यादिकं तेन प्राप्तमग्निसम्बन्धं निमित्तीकृत्य अग्नये होत्रं होमोऽस्मिन्निति बहुव्रीहिणा अग्निहोत्रपदस्य होमनामधेयत्वम्। न च होमस्य वाचिन्याम् अर्थभावनायां करणत्वात् तन्नामत्वे अग्निहोत्रेणेति तृतीया स्यात्। ज्योतिष्टोमेनेति वदिति वाच्यम्। द्वितीयाया एव लक्षणया करणार्थकत्वात्-'नासाधितं करणमिति न्यायेन असाधितस्य करणत्वायोगात्। अर्थात् प्राप्तहोमगतसाध्यत्वानुवादकत्वेन वा द्वितीयोपपत्तेरिति तत्प्रख्यन्यायाद् यागनामधेयस्य न तु यागाङ्गत्व न श्येन-

पक्षिरूपगुणविधिः, यथाह वै-'श्येनो निपत्यादत्ते य एवमेवायं द्विषन्तं भ्रातृव्यं शत्रुं निपत्यादत्त इत्युपमानोपमेयव्यपदेशानुपपत्तिप्रसङ्गात्, श्येनपक्षी यथा पक्ष्यन्तरं निपत्यादत्ते एवमयमपि श्येननामकः कर्म्मविशेषो भ्रातृव्यं शत्रुं निपत्यादत्ते इति व्यपदेशः। कर्म्मनामत्वपक्ष एव युज्यते, यागाङ्गतया श्येनपक्षिविधौ स्वस्य स्वेनैव उपमानोपमेयभावः स्यात्। स चाप्युक्तः, तस्मात् श्येनपदं नामधेयम्। ततश्चाभिचरन् शत्रुवधकामः श्येननामकेन यागेन अभिचारं भावयेदिति वाक्यार्थः।

नन्वेवमप्यभिचारस्यापि वेदोक्तत्वात् आभिचारिके कर्म्मण्यास्तिकानामपि प्रवृत्तिः स्यादिति चेन्न। वेदोक्तोऽप्यभिचारो वेदविहितो न भवति, फलत्वात्। फलं न विधेयं किन्तु फलमुद्दिश्य तत्साधनत्वेन कर्मैव विधेयमिति सिद्धान्तात्। अतोऽभिचारस्याविहितत्वेन प्रत्यवायजनकत्वम्। एवमुद्भिदा यजेत पशुकाम इत्यत्र पशुरूपफलाय विधित्सितस्य यागस्य उद्भित्पदं नामधेयं, न तु यथाकथञ्चित् प्राप्तयागमुद्दिश्य तदङ्गतयोद्भिद्रूपगुणविधिर्दध्यादिवदुद्भिन्नामकस्य गुणस्य अप्रसिद्धत्वात्। यागे तूद्भिद्यते फलमनेनेति योगवचनवृत्तिसम्भवात् यागनामत्वम्। ननु उद्भिद्यते भूमौ अनेनेति योगवशेन खनित्रादावप्युद्भिदः प्रयोगसम्भवात् खनित्रादिगुणविधिः किन्न स्यादिति चेन्न, एतादृशस्थले गुणविधिः क्वापि वक्तुं न शक्यते विरुद्धत्रिकद्वयसमावेशाख्यदोषसङ्गात्।

तथाहि-'उद्भिदा यजेत पशुकाम इत्यत्र मानान्तरेणाप्राप्तस्य यागस्यानुवादासम्भवात् पशुकर्मकभावनायां करणत्वेन यागो विधेयः यागेन तु पशून् भावयेदिति' ततश्च यागस्य विधेयत्वं फलं प्रति शेषतया प्रतीयमानत्वाद् गुणत्वशेषतया

अङ्गतयेत्यर्थः। फलसिद्ध्यर्थं पुंसानुष्ठेयमानत्वात् उपादेयत्वमिति विधेयत्वगुणत्वोपादेयत्वात्मकमेकं त्रिकम् यागे अस्ति, तथा यागोद्देशेनोद्भिद्गुणविधित्सितगुणापेक्षा प्राधान्यम् उद्देश्यत्वम् मनुवाच्यत्वञ्चेति द्वितीयं त्रिकम् तदेतत् त्रिकद्वयपरस्परविरुद्धम् एकस्मिन् यागे प्रसज्येत। अतो न गुणविधिः। न च सोमेन यजेतेत्यत्र विरुद्धत्रिकादिकम् विनैकसोमशब्दस्य सोमयागे लक्षणामङ्गीकृत्य सोमवता यागेनेष्टं भावयेदिति सोमविशिष्टयागविधानाद् यथा सोमरूपगुणविधिः तद्वदुद्भित्पदस्यापि मत्वर्थलक्षणयाऽत्रोद्भिद्गुणविशिष्टयागविधिः स्यादिति वाच्यम्। सोमादौ गत्यन्तराभावान्मत्वर्थलक्षणाया विशिष्टविध्यङ्गीकारादुद्भिदादौ नामत्वेन गतिसम्भवाद्विशिष्टविध्यङ्गीकारायोगात् तस्माद्योगवशादुद्भिदादिनामत्वम्, तथा चित्रया यजेत पशुकाम इत्यत्र चित्रापदं प्राजापत्यनामधेयम् दधिमधुघृतमापीधानास्तण्डुलास्तत्संसृष्टं प्राजापत्यमिति सामानाधिकरण्याद्धोदध्यादिद्रव्यषट्कस्य प्रजापतिदेवतासम्बन्धः श्रुतः तेनानुमितो यागो विधीयते। विहितस्य यागस्य फलाकाङ्क्षायां 'चित्रया यजेतेति वाक्यं फलसम्बन्धविधायकं' तत्र फलार्थत्वेन पुनर्विधिरिति तस्य प्राजापत्ययागस्य दध्यादिविचित्रद्रव्यकत्वात् चित्रापदम् नामधेयम्, नत्वग्नीषोमीयं पशुपालमालभेतेतिवाक्यप्राप्तं पशुयागं यजेतेत्यनूद्य चित्रत्वस्त्रीत्वं गुणद्वयविधानम् मानान्तरप्राप्तकर्मोद्दिश्य तत्रानेकगुणविधाने वाक्यभेदात्। तदुक्तम् 'प्राप्ते कर्म्मणि नानेको विधातुं शक्यते गुणः' इति, मानान्तरप्राप्तकर्म्मत्वे नैकदेवताष्टाकपालपुरोडाशामावास्यापौर्णमास्याद्यनेकगुणविशिष्टो द्रव्यदेवतासम्बन्धेनानुमितो यागो विधीयते इति सिद्धान्तात्। तदुक्तम्। 'अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः' इति।

अथ यथा पशुना यजेतेत्यत्र मानान्तरप्राप्तयागमुद्दिश्यतया पशुनेत्येकपदोपात्तानां पशुद्रव्यतद्गतलिङ्गसङ्ख्यादीनां त्रयाणां वाक्यभेदं विनैव विधिरङ्गीकृतः तद्वदत्राप्येकपदोपात्तचित्रात्वस्त्रीत्वविशेषितपशुद्रव्यकारकस्य विधानान्न वाक्यभेदः अतएव तत्र विधेयस्य पशोरुपादेयत्वात् तद्गतमेकत्वं यज्ञाङ्गतया विवक्षितमित्येकेनैव पशुना यष्टव्यम्। 'ग्रहं सम्मार्ष्टीत्यत्र उद्देश्यगतत्वादेकत्वमविवक्षितमिति सिद्धान्तप्रवादः कथम्? ग्रहं सम्मार्ष्टीत्यत्र ग्रहमिति द्वितीयया ग्रहस्येप्सिततमत्वेनोद्देश्यत्वात् प्रयोजनवत्त्वाच्च प्राधान्यं गम्यते। संमार्गस्तु ग्रहं प्रति गुणभूतः 'प्रतिप्रधानं गुण आवर्त्तनीय' इति न्यायाद् यावन्तो ग्रहास्तेषां सर्वेषां संमार्ग इति निश्चये सति, कति ग्रहाः सम्मार्जनीयाः इति बुभुत्साया अभावादुद्देश्यगतमेकत्वं श्रूयमाणमप्यविवक्षितम् यद्युच्यते नेदमुद्देश्यगतं किन्तु स्वयं विधेयं, ग्रहं संमृज्यात् तच्चैकमिति तथा सति बोधीयभेदाद्वाक्यभेदः स्यात्। तथा बुभुत्साया अभावात् विधिना योगाच्चोद्देश्यगता सङ्ख्या न विवक्षिता, उद्देश्यगतमपि विशेषणं किञ्चिद्विवक्षितं, यस्य विशेषणस्य विवक्षां विना उद्देश्यप्रतीतिर्न पर्यवस्यति यदा तत्रैव ग्रहत्वं विवक्षितं तद्विवक्षां विना उद्देश्यस्वरूपस्य ज्ञातुमशक्यत्वात्। तेन ग्रहजातीयसाधनसोमयागापूर्वार्थत्वाच्चमसेषु न संमार्ग इति स्थितम्। 'पशुना यजेतेत्यत्र यागम् प्रति पशुर्विधेयत्वाद्गुणभूतः, प्रतिगुणं प्रधानावृत्तिर्नास्तीति कियता पशुना यागः कर्त्तव्यः? इत्याकाङ्क्षायाम् एकवचनेन प्रतीयमानं विधेयगतमेकत्वं विवक्षितम् बुभुत्सितत्वात्। किञ्च लिङ्गसङ्ख्याविशेषितस्य पशुद्रव्यरूपकारकस्य एकपदोपात्तस्य विधेयत्वाद्विधेयपशुद्वारा तद्गतलिङ्गसङ्ख्यादे-

रपि त्रिपदोपात्तस्य विधेयत्वाद्विधेयपशुद्वारा एतद्गतलिङ्गसङ्ख्यादेरपि क्रियाङ्गत्वादेकत्वम् विवक्षितम् अथवा तृतीयया विभक्त्याभिहिततया करणकारकशक्त्यात्मसात्कृतयोः प्रातिपदिकार्थपशुद्रव्येण सम्बन्धमनादृत्य तद्वदेव साक्षात् क्रियाङ्गत्वेन विधाने सति पश्चादरुणैकहायनीन्यायेन परस्परमन्वयः। यागाङ्गत्वेनाभिहितो पशुः स एकः पुमांश्चेति। यथा—'अरुण्या पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणातीत्यत्र कारकाणां क्रियान्वयनियमात् करणविभक्तिभिरारुण्यपिङ्गाक्षीत्यादीनां चतुर्णां परस्परमनन्वितानामेव सोमक्रयणाङ्गत्वेन अन्वये सति अरुण्यादेर्गुणस्यामूर्त्तस्य सतः क्रियासाधनत्वायोगात् क्रियासाधनैकहायनीगोपरिच्छेदकत्वेन पश्चात् परस्परं पार्ष्टिकान्वयः—या एकहायनी गौः सा पिङ्गाक्षी अरुणीति। तद्वत् तदेवमुद्देश्यगतविशेषणमविवक्षितम्, उपादेयगतं विवक्षितमिति स्थितम्। एवञ्च चित्रापदेन चित्रा-स्त्रीत्वोभयविशेषितपशुकारकस्य यजेतेति, यदानुदितेऽग्नीषोमीयपशुयागे विधातुं शक्यत्वात् कथं नामत्वमिति चेन्न, तथा सति प्रकृतस्य प्राजापत्ययागस्य फलसम्बन्धाकाङ्क्षस्य हायनमप्रकृताग्नीषोमीययागस्य कल्पना च न स्यात्। तत् द्वयमयुक्तम्। तस्माच्चित्रापदं कर्म्मनामधेयम्, एवं तत्प्रख्यादिभिरन्यतरेण सर्वकर्म्मनामत्वमूह्यम्॥

इत्थं विधिवाक्यस्य प्रामाण्यं विचारितम्॥

अथ अर्थवादविचारः।

अर्थवादानान्तु स्वार्थपरत्वे प्रयोजनाभावादध्ययनविधिवशेन फलवदर्थज्ञानार्थत्वस्यावश्यकत्वाद्विधेयगतप्राशस्त्यप्रतिपादनद्वारा विधिवाक्यतया प्रामाण्यम्। स चतुर्विधः—निन्दाप्रशंसा-परकृति-पुराकल्पभेदात्।

तत्र निन्दार्थवादो यथा—'अ सत्त्रं वा एतद् यदच्छन्दोमयम् अश्रुजं हि रजतं यो वर्हिषि ददाति पुरास्य संम्वत्सराद् गृहे रुदन्ति।'

प्रशंसा यथा—'शोभतेऽस्य मुखं य एवं वेद वायुर्वै क्षेपिष्ठेत्येवमादिः।

परेणेदं महता पुरुषेण कर्म्म कृतमिति प्रतिपादकोऽर्थवादः परकृतिः, यथा—'अग्निर्वा अकामयतेत्यादिः।

परप्रवक्तृ कार्य्यादिप्रतिपादकः पुराकल्पः, यथा—तम शपद् धिया धियात्वा चाध्यासुरित्यादिः।

तत्र, निन्दार्थवादस्य विधेयात्मनिन्दाद्वाराविधेयप्राशस्त्यपरत्वम् अश्रुजमित्यादिरजतनिन्दाद्वारा च विधेयभूतरजतदाननिषेधप्राशस्त्यपरत्वे विरोधाभावात् इतरेषां त्रयाणां साक्षात् प्राशस्त्यपरत्वमेव। वायुर्वा इत्यर्थवादस्य वायुः क्षिप्रगामित्वादतीव प्रशस्तदेवता, अतस्तद्दैवत्यं कर्म्म प्राशस्त्यमिति विधेयदेवतावगतप्राशस्त्यप्रतिपादनद्वारा विध्येकवाक्यत्वम्। अग्निर्वा अकामयतेत्यस्य अग्निदेवत्यो यागः पूर्वकाले अग्निना कृतत्वात् प्रशस्तः आधिक्यत्वादिदानीमपि अन्यैर्यजमानैरवश्यं कर्त्तव्यमिति विधेयकर्म्मगतप्राशस्त्यद्वारं विध्येकवाक्यत्वम्। एवमन्यत्राप्यूह्यम्। क्वचित् कार्य्यान्तरमप्यस्ति, यथा—'अक्ताः शर्करा उपदधातीति' विधावक्ता इतिपदेन द्रवद्रव्य-

सामान्यं प्रतीयते' तच्च द्रव्यं किमिति सन्देहे "तेजो वै घृतमित्यर्थवादात् मन्त्राणामध्ययनविधिना कृत्स्नस्वाध्यायस्य फलवदर्थज्ञानार्थत्वमेव नत्वदृष्टार्थत्वं दृष्टे सम्भवत्यदृष्टकल्पनायोगात्; प्रयोगकाले कर्म्मज्ञानं विना कर्म्मानुष्ठानायोगात् कर्मौपयिकमर्थज्ञानं मन्त्रैः क्रियते। न चोपदेष्टृवचनादिनाप्यर्थस्मरणसम्भवादनुष्ठानोपपत्तिरिति वाच्यम्। मन्त्रैरेवार्थस्मृत्वानुष्ठाने सति फलं भवति नान्यथेति नियमाङ्गीकारात्। नियमेनादृष्टस्याङ्गीकारात् तदभावे तज्जन्यादृष्टलोपे तन्मूलं न सिध्यतीति कल्पनात्।

नन्वेवं मन्त्राणां स्वस्वप्रकाश्येऽर्थे विनियोग इति फलितं विनियोगो नाम शेषत्वेनान्वयः' शेषत्वं नामाङ्गत्वं; ततश्च 'इमामगृभ्णन् रशनामिति मन्त्रस्य रशनाग्रहणसामर्थ्यमस्तीति रशनाग्रहणप्रकाशनसामर्थ्यरूपात् लिङ्गादेव रशनाग्रहणाङ्गत्वोपपत्तेः, 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते' इति वचनं किमर्थमिति? चेत्—न, परिसंख्यार्थत्वात्। चयनप्रकरणे, अश्वरशनाग्रहणं गर्दभरशनाग्रहणञ्चेति द्वयमस्ति, तत्र लिङ्गादश्वरशनायां मन्त्रप्राप्तावुच्यमानायां लिङ्गाविशेषात्गर्दभरशनायामपि मन्त्रः, अतो अश्वरशनायामेव मन्त्रःकार्य्यः न गर्दभरशनायामिति मन्त्रनिवृत्तिरूपपरिसङ्ख्यार्थोऽयं विधिः।

सा च परिसङ्ख्या त्रिदोषा स्वार्थत्यागः—परार्थस्वीकारः, प्राप्तबाधश्चेति। तत्राश्वाभिधानीमादत्त इति वाक्यस्य अनेन मन्त्रेणाश्वरशनादानं कुर्य्यादिति स्वार्थः, स च त्यक्तः; गर्दभरशनातो मन्त्रनिवृत्तिः परार्थः, स च स्वीकृतः; गर्दभरशनायामपि लिङ्गात् प्राप्तस्य मन्त्रस्य अनेन बाधश्चेति त्रिदोषा परिसङ्ख्या गत्यभावादङ्गीकृता गत्यन्तरे सति सा न युक्ता।

एवमष्टदोषदुष्टविकल्पेऽप्यगतिकोऽङ्गीकृतः। यथा यदाग्नेयोऽष्टाकपालः संस्कृतः पुरोडाशो यागाङ्गत्वेनावगतः। तत्र अपूपविशेषस्य पुरोडाशप्रकृतिद्रव्याकाङ्क्षायाम् अनियमेन यस्य कस्य चिद्द्रव्यस्य प्राप्तौ “व्रीहिभिर्यजेतेतिवाक्यात् व्रीहयो नियम्यन्ते, एवं ‘यवैर्यजेतेतिवाक्याद्यवा अपि नियम्यन्ते। तयोरेकार्थत्वाद्विकल्पः। एवम् ‘अतिरात्रे षोडशिनं गृह्णातीति प्रतिषेधात् ग्रहणाभावो विहितः,, तयोर्ग्रहणाग्रहणयोः परस्परविरुद्धयोः एकस्मिन् प्रयोगे अनुष्ठातुमशक्यत्वात् क्वचित् प्रयोगे ग्रहणानुष्ठानं प्रयोगान्तरे तदभावानुष्ठानमिति तत्रापि विकल्पः।

स चाष्टदोषदुष्टः। तथाहि, पूर्वं—व्रीहिप्रयोगे यवशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणप्रामाण्यपरित्यागः, अननुष्ठापकत्वलक्षणाप्रामाण्यस्वीकारः, ततो द्वितीयप्रयोगे यवानुष्ठाने पूर्वं त्यक्तं यत् प्रामाण्यं तत्स्वीकारः, स्वीकृतं यदप्रामाण्यं तत्परित्यागश्चेति यवशास्त्रे चत्वारो दोषाः। एवं पूर्व्वं, यवप्रयोगे व्रीहिशास्त्रं स्वस्वार्थानुष्ठापकत्वलक्षणं तत्परित्यागः, अननुष्ठापकत्वलक्षणं यदप्रामाण्यं तत्स्वीकारः, पुनर्द्वितीयप्रयोगे व्रीह्यनुष्ठाने व्रीहिशास्त्रस्य त्यक्तप्रामाण्यस्वीकारः, स्वीकृताप्रामाण्यपरित्यागश्चेति व्रीहिशास्त्रे चत्वारो दोषाः इत्यष्टदोषदुष्टविकल्पः।

क्वचिदेकार्थत्वादेककार्यकारित्वादित्यर्थः, यथा व्रीह्यादौ, तत्र व्रीहियवयोरेकैकस्य पुरोडाशनिष्पादनक्षमत्वाद्विकल्पः। क्वचित् वचनबलात्; यथा “बृहत्पृष्ठं भवतीति बृहत्सामसाध्यं पृष्ठनामकं स्तोत्रं विहितं, ‘रथन्तरपृष्ठम्भवतीति रथन्तरसामसाध्यं पृष्ठस्तोत्रान्तरं विधीयते। स्तोत्रं प्रयाजादिवदपूर्वार्थत्वादर्थकर्म्मसामानुसंस्कारकर्म्मत्वाद्गुणकर्म्म’

स्तोत्रसाधनीभूतस्तोत्रियाक्षराभिव्यक्तिरूपसंस्कारद्वारा साम्नां स्तोत्रसाधनत्वाङ्गीकारात्' 'प्रगीतमन्त्रसाध्यमिन्द्रादिगुणिनिष्ठगुणाभिधानं, स्तोत्रं—प्रगीतमन्त्रसाध्यं सामाभिव्यक्तऋगक्षरसाध्यमित्यर्थः। 'अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं, शास्त्रं—गानक्रियाविशेषः साम, स्तोत्रसाधनीभूतऋचः स्तोत्रीयाः' तद्गतत्रिवृत्पञ्चदशत्वादिसङ्ख्याविशेषः स्तोमः—इत्येतेषां भेदः। तथाच-बृहद्रथन्तर पृष्ठयोः भिन्नापूर्व्वार्थत्वेन एकार्थत्वाभावेऽपि 'बृहद्वा पृष्ठं कार्यं, 'रथन्तरं वा पृष्ठं कार्य्य'मिति वचनबलादेव विकल्पः। क्वचित् व्यवस्थितविकल्पः, द्वितीयप्रयाजादिकर्म्मणि, नाराशंसतनूनपान् मन्त्रयोः एकार्थत्वाद्विकल्पः, स च राजन्यवशिष्ठानां नाराशंसे द्वितीयप्रयाजसतनूनपादन्येषामितिवाक्यात् व्यवस्थित् इति व्यवस्थितविकल्पः।

तदेवं चोदनापरपर्य्यायाणां विधिवाक्यानाम्। अंशत्रयविशिष्टभावनाविधायकत्वात् प्रामाण्यम्। उद्भिदादीनां नामतयाऽर्थवादानां विधेयप्राशस्त्यपरतया मन्त्राणामनुष्ठेयार्थस्मारकतया प्रामाण्यमिति कृत्स्नस्य वेदस्यालौकिके धर्म्माऽधर्म्माख्ये प्रामाण्यं स्थितम्।

स्मृतयोऽपि मन्वादिप्रणीता वेदमूलकत्वात्स्यादिष्टकादौ धर्मे प्रामाण्यम्। 'औदुम्बरी सर्व्वा वेष्टयितव्येति'रप्रमाणम्, 'औदुम्बरीं स्पृशन् गायेदिति प्रत्यक्षश्रुतिविरुद्धत्वात्। सर्ववेष्टने सति श्रुत्युक्तस्पर्शनस्य कर्त्तुमशक्यत्वात्।

तथा शिष्टाचारोऽपि स्मृतिद्वाराश्रुतिमूलकत्वात् प्रामाण्यम्। मातुलसुता परिणयनादिशिष्टाचारस्त्वप्रमाणं 'मातुलस्य सुतामूढ्वे'त्यादिस्मृत्या निषिद्धत्वेन स्मृतिविरुद्धत्वात्। तदेवं श्रुतिस्मृत्याचाराणां धर्म्माधर्म्मयोः प्रामाण्यमु-

नम्। स च धर्म्मः परस्परं भिन्नः। भेदकप्रमाणानि तु शब्दान्तरादीनि। तथाहि—यागदानहोमानां यजतिददातिजुहोतीत्यपर्यायशब्दप्रतिपाद्यत्वाच्छब्दान्तराद्भेदः। स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनम्। समिधो यजतीत्यादीनां पञ्चानां वाक्यानां मध्ये एकस्य कर्म्मविधायकत्वमन्येषां तस्मिन् कर्म्मणि गुणविधायकत्वमित्यत्र नियामकाभावात्सर्वेषां सर्वविधायकत्वे स्थिते विहितस्य कर्म्मणः पुनर्विधानं व्यर्थमिति 'पुनर्विधानसामर्थ्यात् पूर्ववाक्यविहितकर्मापेक्षयोत्तरोत्तरवाक्यविहितस्य कर्म्मणो भेदः सिध्यतीत्येतादृशस्य शेषविशेषम्; पुनः श्रुतिरूपाद्यजतिपदाभ्यासात् कर्मभेदः। तिस्र आहुतीर्जुहोतीत्यत्र जुहोतिपदाभ्यासाभावेऽपि जुहोतीत्यर्थे होमे त्रित्वसङ्ख्यान्वयात्परस्परभिन्नास्त्रयो होमा इति सङ्ख्यायात्र कर्म्मभेदः। —अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेति ज्योतिष्टोमप्रकरणे श्रुतानामपि ज्योतिराख्यानां यागानां ज्योतिष्टोमापेक्षया भेदः।—भिन्नसंज्ञावशादेव त्रयाणां परस्परं भेद इति संज्ञया कर्म्मभेदः। तथा तप्ते पयसि दध्यानयति वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनमित्यत्र सा वैश्वदेवीति वाक्ये विश्वे देवे देवतामिक्षाद्रव्यसम्बन्धानुमितो यागो विधीयते, वाजिनमित्यत्रापि वाजिदेवत्य-वाजिनद्रव्य-कर्मान्तरं विधीयते। ननु पूर्वविहिते वैश्वदेवयागे वाजिन-द्रव्यरूपगुणो विधीयते पूर्वयागस्यामिक्षागणावरुद्धत्वेन तत्र वाजिनस्य विशेषायोगात्। न च व्रीहियववद्विकल्पः। वाजिनामिक्षयोः समशिष्टत्वाभावात्। विषमशिष्टयोर्विकल्पायोगात् वैश्वदेवयागोत्पत्तिवाक्य एवामिक्षागुणः शिष्यत इति उत्पत्तिविशिष्ट विधीयत इत्यर्थः;

वैश्वदेववाक्यादुत्पन्ने कर्म्मणि वाक्यान्तरेण शिष्टो विहितो वाजिनगुण उत्पन्नशिष्टतयोर्मध्ये ह्युत्पत्तिशिष्टः प्रबलः, कर्मोत्पत्तिवेलायामेव कर्माङ्गत्वेन प्रमितत्वात् उत्पन्नशिष्टो वाजिनगुणो अनन्तरः प्रमितोऽपि विलम्बितत्वेन दुर्लभत्वात् तत्पूर्वकर्म्मणि निवेशमलभमानो वाजिरूपदेवतान्तरसम्बन्धात् स्ववाक्यस्य कर्मान्तरविधायकत्वमानयतीति गुणात् भेदः। "तत् घनीभूतं पय आमिक्षा" शिष्टं जलं वाजिनम्'।—तथा कुण्डपायिनामयने श्रूयते 'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोतीति, अत्र पूर्वं कर्म्म किञ्चिदपि सन्निहितं न भवति अपूर्वकर्म्मसन्निधानरूपात् प्रकरणान्तरात् प्रसिद्धाग्निहोत्रधर्म्मकं तन्नामकं कर्मान्तरं विधीयते।—नन्वग्निहोत्रशब्देन प्रसिद्धाग्निहोत्रमनूद्य गुणविधिः ~~प्राप्ते~~ कर्म्मणि आनन्तर्य्यमासरूपानेकगुणविधौ वाक्यभेदापत्तेरिति प्रकरणान्तरात् तत्कर्म्मभेदः—प्रसिद्धाग्निहोत्रं नैयमिकाग्निहोत्रं नित्याग्निहोत्रमिति यावत्। तदेवं शब्दान्तराभ्याससङ्ख्या-संज्ञा-गुणनामधेय-प्रकरणान्तरैः कर्म्मभेदो दर्शितः।

तत्र वेदादिप्रमेयोऽर्थस्त्रिविधः। क्रत्वर्थफलं तत्करणञ्च पुरुषार्थः, यथा ज्योतिष्टोमादिः स्वर्गादयश्च; दध्यादि तूभयरूपं दध्ना जुहुयादिति फलासंयुक्तवाक्येन क्रत्वर्थत्वात् यथा दध्नेन्द्रियकामस्य जुहुयादित्यनेन फलाय विधानात्। पुरुषार्थत्वात्। तदुक्तम्—'एकस्य तूभयरूपत्वे संयोगवाक्यान्तरस्य पृथक्त्वं भेदः। एकस्य उभयार्थत्वे नियामक इत्यर्थः। क्रत्वर्थे प्रयाजादौ क्रतुः प्रयोजकः पुरुषार्थे फलं प्रयोजकं प्रयोजकत्वं नामानुष्ठापकत्वमित्यर्थः। विधिः यदर्थं यदनुष्ठापयति सः प्रयोजकः। दर्शादिविधिः स्वर्गार्थं दर्शादिक-

मनुष्ठापयतीति स्वर्गादिः दर्शादौ प्रयोजकः ; प्रयाजादिविधिः प्रयाजान् दर्शाद्यर्थम् अनुष्ठापयतीति दर्शादिः प्रयाजानां प्रयोजकः ; दध्यानयनविधिः दध्यानयनमामिक्षार्थमनुष्ठापयति न वाजिनार्थम्, आमिक्षार्थं दध्यानयनानुष्ठाने सति वाजिनस्य स्वतः सिद्धत्वात्, अत आमिक्षैव दध्यानयने प्रयोजिका,न वाजिनम्। पुरोडाशकपालेन तुषानुपवयतीति तुषोपवापाङ्गत्वेन पुरोडाशकपालं विधीयते—तथापि तुषोपवापः कपालस्य प्रयोजको न भवति, पुरोडाशार्थमुपात्तेनैव कपालेन तुषोपवापसिद्धेः किन्तु पुरोडाश एव कपालस्य प्रयोजक इत्याद्यूह्यम्।

ननु विधिना साङ्गप्रधानकर्त्तव्यतया चोच्यते। तत्राङ्गानां प्रधानानां कर्म्मणां बहुत्वात् क्रमेणानुष्ठानं वाच्यम्। तत् क्रमनियामकं प्रमाणं किमिति? चेत् न, श्रुत्यादीनामेव क्रमनियामकत्वात्। तथाहि—अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयतीत्यत्र श्रुत्या गृहपतिदीक्षानन्तरं ब्रह्मदीक्षेति श्रौतक्रमः। समिधो यजति तनूनपातं यजतीत्यादौ विधिवाक्यपाठक्रमे देवसमीपादियागानुष्ठानक्रमः, अग्निहोत्रं जुहोति यवागूम्पचतीत्यत्र यवागूपाकस्य होमार्थत्वेन पाकात् पूर्वं होमं कर्त्तुमशक्यत्वात् क्रमं त्यक्त्वा अर्थक्रमः स्वीकर्त्तव्यः। अर्थः प्रयोजकं होमरूपं तदर्थक्रमः अर्थक्रमः। तेन पूर्वं पाकः पश्चाद्धोमः। तथा सप्तदश प्राजापत्यान् पशूना लभत इत्यत्र सप्तदशपशुद्रव्यकप्रजापतिदेवताकाः सप्तदशयागाः कर्त्तव्यत्वेन बोधिताः। तत्रोपाकरणाख्यः आद्यः पदार्थः। यतः कुतश्चिदारभ्य यत्र क्व च समापनीयः नियोजनादिकन्तु येन क्रमेण उपाकरणं प्रवृत्तं तेनैव क्रमेण कर्त्तव्यम्। कथं प्रकृतावग्नीषोमीयपशोरेक-

THE ACADEMY OF SANSKRIT RES
MELKOTE-571431.
(KARNATAKA STATE)

त्वेन उपाकरणमादौ कृत्वा द्वितीयक्षण एव प्रोक्षणं व्यवधानप्रयोजकाभावात्। अत्र तु सप्तदशपशूनां सहानुष्ठेयत्ववचनात् प्रथमतो यत्र क्वचित्पशौ कृतमुपाकरणं स्वाश्रयकर्त्तव्यनियोजनाय षोड़शाभः क्षणः व्यवधानं सह तेन त्वधिकं तत्रोपकरणक्रमेण नियोजनं प्रथमपशावकृत्वा पश्वन्तरे नियोजनं कृत्वानन्तरं प्रथमपशौ नियोजनकरणे षोड़शक्षणाधिकक्षणव्यवधानं शास्त्राननुमतमापद्येत। तन्निरासायोपकरणम् येन क्रमेण प्रवृत्तं तेनैव नियोजनादिकं कार्य्यमिति प्रकृतिक्रमः। तथा ज्योतिष्टोमे औपवसथ्यमहरारभ्य क्रमेणानुष्ठेयानाम् अग्निषोमीयानुवन्ध्यानां पशूनां त्रयाणां साध्यस्काख्ये सोमयागे 'सह पशूनालभेत' इत्येकदानुष्ठानलक्षणं साहित्यं बोधितं, तदपि सवनीयस्य स्थाने विहितं, तत्र प्राक् कृतक्रमं परित्यज्य सवनीयस्य स्थानसाहित्यविधानादादौ सवनीय पशोरुपाकरणं ततोऽग्नीषोमीयस्य ततोऽनूवन्ध्यायाः। इति स्थानात् क्रमः। श्रुत्यादिवशात् पूर्वम्महरौपवसथ्यन्तथा दर्शे सान्नाय्यधर्माणां शाखाच्छेदादीनां पूर्वमाग्नेयधर्माणां निर्वापादीनाञ्च। अनन्तरं प्रवृत्तावपि मुख्ययोराग्नेयः सान्नाय्ययागयोर्मध्ये आग्नेययागस्य पूर्वमनुष्ठानान्मुख्ययागक्रमेणादावाग्नेयपुरोडाशस्य प्रयाजशेषाभिघारणं ततः पयसोऽभिघारणम् इति मुख्ययागकर्म्मादभिघारणक्रमः। इत्येवं श्रुत्यर्थपाठस्थानमुख्यप्रवृत्तिक्रमैरेव कर्मानुष्ठानम्। अन्यथानुष्ठाने वैगुण्यमित्यलम्॥

इति श्रीकृष्णयज्वकृता मीमांसापरिभाषा समाप्ता।

Accn. No. 5408